स्त्री॰ दक्षिणदिशश्च भूगोले यथाधरत्वं तथा उदकशब्दे वक्ष्यते । सर्वनाम्नां वृत्तौ पुंवद्भावात् अधरस्यां भवः अधरतन इत्यादि अधरस्यां वर्त्तते अधरवृत्तिः अधरा अधरस्याः अधरस्यामित्यर्थे अधरत इत्यादि । [अधोभागे इत्यर्थे ।

**अधरतस्** अव्य॰ अधर—तसिल् । प्रथमापञ्चमीसप्तम्यर्थवृत्तौ

**अधरस्तात्** अव्य॰अधर+अस्ताति च॰ । अधरत इत्यर्थे । "पुरस्तात् सवितोत्तरत्तादधरत्तादिति" ऋ॰ १०,३६,१४,

**अधरमधु** न॰ अधरस्य मध्विव आस्वादातिशयात् । अधररसे । [रतइत्यर्थे

**अधरस्तात्** अव्य॰ अधर+सप्तम्याद्यर्थे अस्ताति । अध-

**अधराच्** त्रि॰ अधरां दक्षिणां दिशमञ्चति क्विप् । दक्षिण दिग्गन्तरि । "प्राङ् वा उदङ् वाऽधराङ् वा प्रध्यायीताभिनन्द्याच्च इति छा॰ उ॰ । स्त्रियामधराचीति । सा च दक्षिणस्यां दिशि च ।

**अधराचीन** त्रि॰ अधराचि भवः अधराच्+ख । अधःप्रदेशभवे । "अधराचीनमक्रणोदपामप" इति ऋ॰ २,१७,५,

**अधराच्य** त्रि॰ अधरच्यां भवः यत् । दक्षिणदिग्भवे अधोदिग्भवे च । "अरसं प्राच्यं विषमरसं यदुदीच्यम् अथैकमधराच्यमिति" वेदः ।

**अधरात्** अव्य॰ अधर+अस्त्यर्थे आति । अधरतइत्यस्यार्थे । "पश्चादोत्तरादधरादापुरस्तादिति" ऋ॰ ६,८,८, अधरात् दक्षिणत इत्यर्थः ।

**अधरीण** त्रि॰ अधरे भवः अधर+ख । अधरभवे ।

**अधरेण** अव्य॰ अधरस्मिन् देशे, दिशि वा अधर+एनप् । प्रथमासप्तमीवृत्तौ आसन्ने नीचे देशादौ, सन्निकृष्टदक्षिणदिशि च । [त्वसुपचारात् । अधरदिवसे ।

**अधरेद्युस्** अव्य॰ अधरे दिने अधर+एद्युस् । कालवृत्ति-

**अधरोत्तर** न॰ अधरञ्च उत्तरञ्च समा॰द्व॰। न्यूनाधिक्यवर्ति निम्नोन्नते । "अद्यात् काकः पुरोडाशं श्वावलिह्याद्धविस्तथा स्वाम्यं च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरमिति" मनुः ।

**अधर्म्म** पु॰ ध्रियतेऽनेन धृ—मनिन् विरोधे न॰त॰ । धर्म्मविरोधिनि वेदादिनिषिद्धकर्म्मजन्ये पापे, तद्धेतुभूतप्राणिहिंसादौ च । "नोदनालक्षणोऽर्थोधर्म्म" इति सूत्रकारेण निषेधलक्षणोऽनर्थोऽधर्म्म इति तल्लक्षणं सूचितम् तत्र वेदप्रतिपाद्योऽर्थोधर्म्मः, तन्निषेधप्रतिपाद्योऽनर्थः अधर्मः । स च निषिद्धकर्म्माधीनः पापनामा अदृष्टभेदः । अनर्थस्य अनिष्टसाधनम् । तत्सत्त्वयुक्तिस्तु "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् अनिग्रहाच्चेन्द्रियाणाम् नरः पतनमृच्छतीति" । "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इत्यादिना शास्त्रेण कर्म्मणामाशुविनाशिनां कालान्तरभाविनरकादिजन्मविशेषान् प्रति हेतुत्वोक्तावपि तथात्वं मध्यस्थद्वारीभूतमदृष्टं विना न सम्भवतीति तत् कल्प्यते अतः 'चिरध्वस्तं फलायालमित्यादिना" अदृष्टशब्दे दर्शितयुक्तेश्च पापसत्त्वसाधनम् । "अधर्म्मेणैधते तावत् ततो भद्राणि पश्यति । ततः सपत्नान् जयति समूलस्तु विनश्यतीति" मनुः । "अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहमिति" गीता । अधर्म्मभेदात् गतिविशेषोक्तेश्चाधर्म्मसत्त्वम् यथा

"कर्म्मभिर्नियतैर्बद्धो जन्तुर्दुःखान्युपाश्नुते । येन येन तु भावेन कर्म्मणा पुरुषो गतिम् । प्रयाति परुषां घोरां तत्ते वक्ष्याम्यतः परम् । अधीत्य चतुरो वेदान् द्विजो मोहसमन्वितः । पतितात् प्रतिगृह्याथ खरयोनौ प्रजायते । खरो जीवति वर्षाणि दश पञ्च च भारत ! । खरो मृतो बलीवर्द्दः सप्त वर्षाणि जीवति । बलीवर्द्दो मृतश्चापि जायते ब्रह्मराक्षसः । ब्रह्मरक्षश्च मासांस्त्रींस्ततो जायेत ब्राह्मणः । पतितं याजयित्वा तु कृमियोनौ प्रजायते । तत्र जीवति वर्षाणि दश पञ्च च भारत ! । कृमिभावाद्विमुक्तस्तु ततो जायेत गर्द्दभः । गर्द्दभः पञ्च वर्षाणि पञ्च वर्षाणि शूकरः । कुक्कुटः पञ्च वर्षाणि पञ्च वर्षाणि जम्बुकः । श्वा वर्षमेकं भवति ततो जायेत मानवः । उपाध्यायस्य यः पापं शिष्यः कुर्य्यादबुद्धिमान् । स जीव इह संसारांस्त्रीनाप्नोति न संशयः । प्राक् श्वा भवति राजेन्द्र ! ततः क्रव्यात्ततः खरः । ततः प्रेतः परिक्लिष्टः पश्चाज्जायेत ब्राह्मणः । मनसाऽपि गुरोर्भार्य्यां यः शिष्यो याति पापकृत् । स उग्रान् प्रैति संसारानधर्म्मेणेह चेतसा । श्वयोनौ तु स सम्भूतस्त्रीणि वर्षाणि जीवति । तत्रापि निधनं प्राप्तः कृमियोनौ प्रजायते । कृमिभावमनुप्राप्तो वर्षमेकन्तु जीवति । ततस्तु निधनं प्राप्य ब्रह्मयोनौ प्रजायते । यदि पुत्त्रसमं शिष्यं गुरुर्हन्यादकारणे । आत्मनः कामकारेण सोऽपि हिंस्रः प्रजायते । पितरं मातरञ्चैव यस्तु पुत्त्रोऽवमन्यते । सोऽपि राजन् ! मृतो जन्तुः पूर्व्वं जायेत गर्दभः । गर्द्दभत्वन्तु सम्प्राप्य दश वर्षाणि जीवति । संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः । पुत्त्रस्य मातापितरौ यस्य रुष्टावुभावपि । गुर्व्वपध्यानतः सोऽपि मृतो जायेत गर्दभः । खरो जीवति मासांस्तु दश श्वा